ॐ श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितः

श्रीविष्णुतत्त्वविनिर्णयः

अथ श्रीटिकाकृत्पादाचार्यकृत ग्रन्थस्य मङ्गळाचरणश्लोकानि

विश्वस्योदयमातनोति तदनुत्राणं विधत्ते पुनः ।
सौख्यान्नीतरहानि साधनं अलं वक्तिश्रुतीर्व्यञ्जयन् ॥

स्वापं प्रापयति श्रमापहृतये कल्पावसाने च यः ।
तं देवं पितरं पतिं गुरुतमं वन्दे रमावल्लभम् ॥

लसतु श्रीमदानन्दतीर्थेन्दुर्नो हृदम्बरे ।
यद्वचश्चन्द्रिका स्वान्तसन्तापं विनिकृन्तति ॥

पदवाक्यप्रमाणज्ञान् प्रणम्य शिरसा गुरून् ।
व्याकरिष्ये यथाबोधं विष्णुतत्त्वविनिर्णयम् ॥

इति मङ्गळाचरणम्

॥ प्रथमः परिच्छेदः॥

ॐ ॥ सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥

विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात्सज्जनसंविदे ॥

"ऋगाद्या भारतं चैव पञ्चारात्रमथाखिलम् ।
मूलरामायणं चैव पुराणं चैतदात्मकम् ॥
ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः ।
दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः ॥
ज्ञेय एतैस्सदायुक्तैर्भक्तिमद्भिः सुनिष्ठितैः ॥
न च केवलतर्केण नाक्षजेन न केनचित् ।
केवलागमविज्ञेयो भक्तैरेव न चान्यथा" ॥

— इति ब्रह्माण्डे ।

"नावेदविन्मनुते तं बृहन्तम् । सर्वानुभूमात्मानꣳ साम्पराये" ।

— इति तैत्तिरीयश्रुतिः । (तै.आ. ३.१२.९.१७)

"नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ" ।

— इति कठश्रुतिः । (कठ उ. १.२.९)

"नेन्द्रियानि नानुमानं वेदा ह्येवैनं वेदयन्ति तस्मादाहुः वेदाः" ।

— इति पिप्पलादश्रुतिः ।

न चैतेषां वचनानामेवाप्रामाण्यं ।

अपौरुषेयत्वाद् वेदस्य ।

"इतिहासपुराणः पञ्चमो वेदानां वेदः" (छा. उ. ७.१.४) इति
तद्गृहीतत्वाच्च ।

न च 'अपौरुषेयं वाक्यमेव नास्ति', इति वाच्यम् ।
तदभावे, सर्वसमयाभिमत धर्माद्यसिद्धेः ।
यस्य तौ नाभिमतौ, नासौ समयी — समयप्रयोजनाभावात् ।

न च तेन लोकोपकारः — धर्माद्यभावज्ञाने परस्परहिंसादिना
अपकारस्यैव प्राप्तेः ।

न चोपकारेण तस्य प्रयोजनम् — अदृष्टाभावात् ।

अतो धर्माद्यभावं वदता स्वसमयस्यानर्थक्यं अङ्गीकृतमेवेति
नासौ समयी ।

न च पौरुषेयेण वाक्येन तत्सिद्धिः । अज्ञानविप्रलम्भयोः प्राप्तेः ।

न च तदर्थत्वेन सर्वज्ञः कल्प्येत ।
अन्यत्रादृष्टस्य सर्वज्ञत्वस्य कल्पनं, तस्याविप्रलम्भकत्वकल्पनं,
तस्य तत्कृतत्वकल्पनं चेति कल्पनागौरवप्राप्तेः ।

अपौरुषेयवाक्याङ्गीकारे न किञ्चित्कल्प्यम् ।

अपौरुषेयत्वं च स्वत एव सिद्धम् ।
वेदकर्तुरप्रसिद्धेः । अप्रसिद्धौ च कर्तुस्तत्कल्पने
कल्पनागौरवम् । अकल्पने चाकर्तृकत्वं सिद्धमेव ।

न च लौकिकवाक्यवत्सकर्तृकत्वम् ।
तस्याकर्तृकत्वप्रसिद्ध्यभावात् ।

न च केनचित्कृत्वा 'वेद' इत्युक्तं वेदसमम्, परम्पराभावात् ।

न च स्वयम्प्रतिभातवेदैः दृष्टमवेदवाक्यं भवति,
परम्परासिद्ध वेदवाक्यानुसारित्वात् ।
वेदद्रष्टृणां उक्तगुणवत्वाच्च तेषाम् ।

उक्तं च ब्रह्माण्डे —

"विंशल्लक्षणतोऽनूनस्तपस्वी बहुवेदवित् ।
वेद इत्येव यं पश्येत् स वेदो ज्ञानदर्शनात्" ॥

— इति ।

प्रामाण्यं च स्वत एव । अन्यथाऽनवस्थानात् ।

न चोक्तयुक्तयधीनत्वं प्रामाण्यस्य ।
बुद्धिदोषनिरासमात्रकारणत्वाद्युक्तीनाम् ।

अदुष्टबुद्धीनां स्वत एव सिद्धत्वाच्च प्रामाण्यस्य ।

न च 'आकाङ्क्षायामेव प्रमाणान्तरापेक्षत्वादनवस्थाभावः' इति वाच्यम्

— आकाङ्क्षायां एव बुद्धिदोषात्मकत्वात् ।

दुष्टबुद्धीनामेवाप्रामाण्यशङ्का, इति परतोऽप्रामाण्यम् ।

प्रामाण्यं च स्वत एव सिद्धम् ।

न च 'उच्चारणकाल एव वर्णानामुत्पत्तिः' इति वाच्यम्, 'तदेवेदं वचनम्' इति प्रत्यभिज्ञाविरोधात् ।

न च 'सादृश्यात्, प्रत्यभिज्ञा भ्रान्तिः', इति वाच्यम् ।
'सोऽयं देवदत्तः' इत्यादेरपि तथात्वप्राप्तेः ।

सर्वक्षणिकत्वं वदता बौद्धेन सेयं दिगित्यादिप्रत्यभिज्ञाया भ्रान्तित्वं न वाच्यं — पञ्चस्कन्धेभ्योऽन्यत्वात् ।

न च दिश एव भ्रान्तिकल्पिताः । विज्ञानशून्ययोरपि साम्यात् ।

न चादित्योदयादिनैव दिक्कल्पना — अन्धकारेऽपि दिङ्मात्रप्रतीतेः ।
कादाचित्कभ्रान्तिरेवादित्योदयादिदर्शनान्निवार्यते ।

सा च 'विज्ञानशून्ययोरपि भवति' इति तेषां मतम्, वादिविप्रतिपत्तेः ।
अतो 'दिशस्स्थिरा एव' इति सिद्ध्यति, शून्यवदेव ।
अतस्तद्वद्वेदस्यापि स्थैर्यं सिद्धम् — 'तदेवेदं वाक्यम्' इति प्रत्यभिज्ञानात् ।

न चानुमानादीनामागमं विना प्रामाण्यं धर्मादिषु ।
तदगोचरत्वात् ।

अतो — 'अपौरुषेयवाक्येनैव धर्मादिसिद्धेः' — सर्ववादिनामपि तदङ्गीकार्यम् ।

तत्प्रामाण्यं च स्वत एव सिद्धम् ।

अप्रामाण्यस्य च परतस्त्वानङ्गीकारे, दुष्टेन्द्रियादेरप्यप्रामाण्यहेतुत्वं न स्यात्? तदनङ्गीकारे चानुभवविरोधः ।

अतः, 'प्रामाण्यं स्वतः, परतोऽप्रामाण्यम्' — इति सिद्धम् ।

"वाचा विरूप नित्यया" (ऋग्वेद ८.७५.६) ।

"नित्ययाऽनित्यया स्तौमि ब्रह्म तत्परमं पदम्" इति ।
"श्रुतिर्वाव नित्या अनित्या वाव स्मृतयो याश्चान्या वाचः" इति
पैङ्गिश्रुतिः ।

"विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः ।
अनादिनित्या सा तच्च विना तां न स गम्यते" ॥

— इति कात्यायनश्रुतिः ।

"सहस्रधा महिमानः सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक्" ।
"कश् छन्दसां योगम् आ वेद धीरः को धिष्ण्याम् प्रति वाचम् पपाद"
(ऋग्वेद १०.११४.९) इत्यादि च ।

"नित्या वेदाः समस्ताश्च शाश्वताः विष्णुबुद्धिगाः ।
सर्गे सर्गेऽमुनैवैत उद्गीर्यन्ते तथैव च ।
तत्क्रमेणैव तैर्वर्णैस्तैः स्वरैरेव नचान्यथा ।
अतः श्रुतित्वमेतासां श्रुता एव यतोऽखिलैः ।
जन्मान्तरे श्रुतास्तास्तु वासुदेवप्रसादतः ।
मुनीनां प्रतिभास्यन्ति भागेनैव न सर्वशः ।
यतस्ता हरिणा दृष्टाः श्रुता एवापरैर्जनैः ।
श्रुतयो दृष्टयश्चेति तेनोच्यन्ते पुरातनैः ।
तदुत्पत्तिवचश्चैव भवेद्यथक्तिमपेक्ष्य तु ।
चेतनस्य जनिर्यद्वदुच्यते सर्वलौकिकैः ।
पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु ।
क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत् ।
वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्तयपेक्षया ।
अवान्तराभिमानानां देवानां वा व्यपेक्षया ।
नानित्यत्वात्कुतस्तेषामनित्यत्वं स्थिरात्मनाम्" ॥

— इति ब्रह्माण्डे ।

न चानित्यत्वे, 'श्रुतिर्', 'वेद', इत्यादि विशेषशब्द उपपद्यते —

"वेदास्ते नित्यविन्नत्वाच्छ्रुतयश्चाखिलैः श्रुतेः ।
आम्नायोऽनन्यथा पाठादीशबुद्धिस्थितास्सदा" ॥

— इति महावाराहे ।

न च नित्यत्वं विना वेदानां दर्शनव्यवहारो युज्यते ।

न च वर्णपदादीनामनित्यत्वं वक्तुं युक्तम्, सर्वज्ञत्वादीश्वरस्य तद्बुद्धौ
सर्वदा प्रतीयमानत्वात् ।

न च घटादिवत्संस्कारमात्रत्वं वक्तुं युक्तम्, प्रत्यभिज्ञाविरोधस्योक्तत्वात् ।

पुराणानामप्यन्यथाशब्दरचनमेवानित्यत्वम् ।

अत आकाशगुणे शब्दे व्यज्यमाना वर्णादयस्तत्क्रमात्मको वेदश्च नित्य एवेति सिद्धम् ।

न च केवलसिद्धेऽर्थे व्युत्पत्त्यभावादप्रामाण्यम् ।
सिद्धान्वित एव व्युत्पत्तिगृहीतेः ।

'इयं माता', 'अयं पिता' इत्यादावङ्गुलिप्रसारणादिपूर्वकनिर्देशेनैव
हि तज्जानाति ।

'कार्यान्वित एव व्युत्पत्तिः' इति वदतः, कार्यस्य कार्यान्वयाभावात्
कल्पनागौरवम् ।

'इयं माता', 'अयं पिता', 'सुरूपोऽसि', इत्यादौ
सिद्धमात्रज्ञापनेन पर्यवसितत्वाद्वाक्यस्य ।

तस्य तत्र प्रामाण्यानुभवाच्च ।

न च कुत्रचित्सिद्धज्ञापनादन्यद्वाक्यस्य प्रयोजनं दृष्टम् ।

ज्ञात्वैव हीष्टसाधनतां प्रवर्तते निवर्तते च विपर्ययेण ।
अतः सिद्ध एव सर्ववाक्यानां प्रामाण्यं सिद्धम् ।

प्रसिद्धं च व्याकरणनिरुक्तादीनां सिद्धमात्रे प्रामाण्यं सर्ववादिनाम् ।

तदनङ्गीकारे च सर्वशाब्दव्यवहारासिद्धिः ।

उक्तं च नारदीये —

"सर्वज्ञं सर्वकर्तारं नारायणमनामयम् ।
सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि ।
सर्वेषामपि वेदानां इतिहासपुराणयोः ।
प्रमाणानां च सर्वेषां तदर्थं चान्यदुच्यते" ॥

— इति ।

न च जीवेश्वराभेद एव तात्पर्यमागमस्य — तत्र प्रमाणाभावात् ।

न च जीवेश्वरभेदः सिद्धः इत्यनुवादकत्वं भेदवाक्यानाम् ।
आगमं विना ईश्वरस्यैवासिद्धेः ।

न चानुमानात्तत्सिद्धिः, विपर्ययेणाप्यनुमातुं शक्यत्वात् ।

'विमतं सकर्तृकं, कार्यत्वाद्, घटवद्' इत्युक्ते,
'विमतं विकर्तृकं, अस्मत्सम्मतकर्तृरहितत्वात्, आत्मवद्'
इत्यनुमानविरोधात् ।[1]

'अकार्यत्वमुपाधिः' इत्युक्ते, 'शरीरिजन्यत्वमितरत्राप्युपाधिः'
इत्युत्तरम् ।

प्रत्यक्षानुमानसिद्धत्वे च भेदस्य तद्विरोधादेवाप्रामाण्यमभेदागमस्य ।

तेनाभेदागमस्य प्रामाण्याभावे नानुवादकत्वं भेदवाक्यानाम् ।

न हि बलवतोऽनुवादकत्वं, दार्ढ्यहेतुत्वात् ।

प्रत्यक्षादेरागमस्य प्राबल्येऽपि, नोपजीव्यप्रमाणविरोधे प्रामाण्यम् ।

विषयाभावे स्वस्यैवाप्रामाण्यप्राप्तेः ।

तेनैव ह्यनुमानादिनागमस्य विषयः सिद्ध्यति, तत्पक्षेऽपि ।

अनुमानेन ह्यनुवादित्वपक्ष ईश्वरो बोद्धव्यः प्रत्यक्षेण चागमः ।
अतस्तयोर्विरोधे प्रामाण्यं न स्यात् ।

अनुमानसिद्धेश्वराच्च भेदोऽनुभवतः सिद्धः जीवस्य असार्वत्रिकत्वेनानुभवात् ।
न चानुभवविरोधे आगमस्य प्रामाण्यम् ।

---

[1] इतः परं 'प्रत्यक्षानुमानसिद्धत्वे च भेदस्य' इत्यतः पूर्वं
वाक्यद्वयं मूलकोशेषु अदर्शनात् प्रक्षिप्तमित्याहुः । तथापि
गङ्गाजलानुप्रविष्टक्षुद्रनदीजलस्येव तस्याप्युपादेयत्वाद् व्याख्यानं
क्रियते — श्रीमज्जयतीर्थश्रीचरणाः

आगमप्रामाण्यानुभवस्याप्यप्रामाण्यप्राप्तेः ।

बहुप्रमाणसंवादश्च दार्ढ्यहेतुरेव ।

बहूनां वचने तस्यैव दर्शने दार्ढ्यस्यैव दृष्टेः ।

सर्वाविवादस्थळे एव कथञ्चिदनुवादकत्वम् ।

न चात्र सर्वाविवादः एकत्ववादिनामेव विवाददर्शनात् ।

बहुप्रमाणविरोधे चैकस्याप्रामाण्यं दृष्टं शुक्तिरजतादौ ।

न च दोषजन्यत्वादेव दुर्बलत्वमिति विरोधः ।
बहुप्रमाणविरुद्धानां दोषजन्यत्वनियमात् ।

दोषजन्यत्वं च बलवत्प्रमाणविरोधादेव ज्ञायते ।

"अदुष्टमिन्द्रियन्त्वक्षं तर्कोऽदुष्टस्तथानुमा ।
आगमोऽदुष्टवाक्यं च स्वदृक्चानुभवः स्मृतः ।
बलवत्प्रमाणतश्चैव ज्ञेया दोषा नचान्यथा ।
द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ।
तयोस्स्वभावो बलवानुपजीव्यादिकश्च सः ।
याथार्थ्यमेव प्रामाण्यं तन्मुख्यं ज्ञानशब्दयोः ।
ज्ञानं च द्विविधं बाह्यं तथानुभवरूपकम् ।
बल्येवानुभवस्तत्र निर्दोषं त्वक्षजादिकम् ।
अनुप्रमाणतां याति तथाक्षादित्रयं ततः ।
प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम् ।
उपजीव्यविरोधे तु न प्रामाण्यं अमुष्य च ।
यामाहुरनुमां केचित्त्रियाद्यवयवात्मिकाम् ।
सा व्यर्था नोपपत्त्या हि विना सापि प्रमाणताम् ।
यात्यतो युक्तिरेवैका प्रमाणमनुमात्मकम् ।
युक्तिः प्रतिज्ञारूपा च हेतुदृष्टान्तरूपिका ।
तथोपनयरूपा च परा निगमनात्मिका ।
पृथक् पृथक्प्रमाणत्वं याति युक्तितयैव तु ।
प्रतिज्ञा हेतुगर्भैव पृथक्प्रामाण्यमेष्यति ।
सिद्धत्वेन प्रतिज्ञाया हेतुर्मानं पृथग्भवेत् ।
प्रतिज्ञावयवत्वात्तु स्वातन्त्र्येणैव मानताम् ।
दृष्टान्तो यात्युपनयो व्याप्तिमाश्रित्य केवलम् ।
व्याप्तिस्तु केवलाऽपि स्यात्प्रमाणं नियमाश्रयात् ।

तथा निगमनं चोपसंहारैकस्वरूपतः ।
प्रामाण्यं यात्यनुभवो ज्ञापयत्युपपत्तिताम् ।
विरोधश्च तथाधिक्यं न्यूनताऽसङ्गतिस्तथा ।
उपपत्तिदोषा विज्ञेया विरोधश्च स्वतोऽन्यतः ।
जनकस्यात्ययो जातिः स्वस्य वाऽन्यस्य वा भवेत् ।
जनकं प्रमाणमुद्दिष्टं स्वस्यार्थस्य प्रकाशनात् ।
निग्रहा एत एव स्युस्संवादानुक्तिसंयुताः ।
अर्थतः प्राप्तिरेवार्थापत्तिरित्यभिधीयते ।
दृष्ट्वा सदृशमेवान्यं पूर्वदृष्टे तु वस्तुनि ।
एतत्सदृशताज्ञानमुपमानं प्रकीर्तितम् ।
अभावस्य परिज्ञानं द्विविधं समुदाहृतम् ।
एकं तत्रानुभवतो योग्यस्यानुपलब्धितः ।
द्वितीयमपि विज्ञेयं सुखाद्ये च घटादिके ।
एकम्प्रत्यक्षरूपं स्यात् द्वितीयमनुमात्मकम् ।
क्वचिद्घटाद्यभावोऽपि प्रत्यक्षेणावगम्यते ।
झटित्येव परिज्ञानात् न लिङ्गोद्भवता मता ।
अर्थापत्तिश्चोपमा च ह्यनुमाभेद एव तु ।
आगमो द्विविधो ज्ञेयो नित्योऽनित्यस्तथैव च ।
प्रत्यक्षं त्रिविधं ज्ञेयं ऐश्वरं यौगिकं तथा ।
अयौगिकं चेति तथा सर्वमक्षात्मकं मतम् ।
अक्षाणि च स्वरूपाणि नित्यज्ञानात्मकानि च ।
विष्णोः श्रियस्तथैवोक्तान्यन्येषां द्विविधानि तु ।
स्वरूपाणि च भिन्नानि भिन्नानि त्रिविधानि च ।
दैवासुराणि मध्यानीत्येतत्प्रत्यक्षमीरितम् ।
विषयान्प्रतिस्थितं ह्यक्षं प्रत्यक्षमिति कीर्तितम् ।
अक्षयं पुरुषस्याक्षं स्वरूपे मुख्यमेव तु ।
उपचारस्तदन्यत्र सृष्टावुपचयो यतः ।
उपपत्तिस्वरूपत्वादनुमा सम्भवादिकम् ।
प्रत्यक्षागममाहात्म्यादनुमानं प्रमाणताम् ।
याति नैवान्यथा तस्य नियतत्वं क्वचिद् भवेत्" ॥

— इति ब्रह्मतर्के ॥८१॥

अत्र चोपजीव्यत्वेन प्रमाणप्राबल्यात् भेद एव तात्पर्यं युक्तम् ।

कथं चानुवादकत्वं भेदस्य प्रमाणेनासिद्धौ? सिद्धौ च
कथमभेदवाक्यस्याबाधः?

न चाप्रमाणसिद्धेन अनुवादकत्वं प्रमाणस्य भवति ।

दुर्बलत्वे च भेदप्रमाणस्याभासत्वात् न भेदवाक्यानामनुवादित्वम् ।

अतश्च भेदवाक्यानामेव प्राबल्यम् ।

सर्वप्रमाणविरुद्धवचनानामेव प्राबल्याङ्गीकारे "इदं वा अग्रे नैव किञ्चनासीद्" "असतः सदजायत" (छा.उ. ६.२.१) इत्यादीनामेवाविचारेण प्रतीयमानस्यार्थस्य सर्वप्रमाणविरुद्धत्वात्तत्र सर्वागमानां महातात्पर्यं प्रसज्येत ।

न च 'तत्र युक्तिविरोधः' इति वाच्यम् ।

तस्मिन्पक्षे 'युक्तिविरुद्धत्वेन अननुवादित्वम्', इति गुण एव स्यात्?

युक्तिसिद्धत्वे ह्यनुवादित्वं स्यात्?

अतः प्रमाणसिद्धत्वे तदपलापायुक्तेः । अप्रमाणसिद्धत्वे च भेदप्रमाणस्य अनुवादित्वाभावाच्च न भेदवाक्यानां दौर्बल्यम् ।

न च प्रमाणबहुत्वे दौर्बल्यम् । दृढार्थमेवादि बहुवाक्यसंवादे दृष्टम् ।

तथा सति, अभ्यासादेरप्यप्रामाण्यहेतुत्वं स्यात्?

अभ्यासस्य च तात्पर्यलिङ्गत्वं सर्वेषां सिद्धम् ।

तदनङ्गीकारे, तत्पक्षेऽपि नवकृत्वः "तत्त्वमसि" (छा.उ. ६.८.७, ६.९.४, ६.१०.३, ६.११.३, ६.१२.३, ६.१३.३, ६.१४.३, ६.१५.३, ६.१६.३) इत्यभ्यासस्यानुवादकत्वेन अप्रामाण्यं स्यात्?

'प्रथमवाक्येनैव यस्यासिद्धं, तदर्थमपरम्' इत्युक्ते, 'प्रत्यक्षादिना भेदो येनानिश्चितः, तदर्थमपरं वाक्यम्' इत्युत्तरम् । तस्माद्, बहुप्रमाणसंवादित्वे प्राबल्यमेव ।

अतः सर्वप्रमाणविरुद्धत्वान्नाभेदे तात्पर्यं वाक्यस्य, किन्तु विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम् ।

तथा चोक्तं भगवता —

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

यस्मात्क्षरमतीतोऽहं अक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत ॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।
एतद् बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत" ॥ (भ.गी. १५.१६-२०)

— इति ।

"सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम् ।
अवान्तरं तत्परत्वं तदन्यत्सर्वागमानां पुरुषार्थस्ततोऽतः" ॥

— इति पैङ्गिश्रुतिः ।

"मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम् ।
उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम्" ॥

— इति महावाराहे ।

युक्तं च विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम् । मोक्षो हि सर्वपुरुषार्थोत्तमः —

"धर्मार्थकामास्सर्वेऽपि न नित्या मोक्ष एव हि ।
नित्यस्तस्मात्तदर्थाय यतेत मतिमान् नरः" ॥

— इति भाल्लवेयश्रुतिः ।

"अनित्यत्वात् सदुःखत्वात् न धर्माद्याः परं सुखम् ।
मोक्ष एव परानन्दः संसारे परिवर्तताम्" ॥

— इति भारते ।

मोक्षश्च विष्णुप्रसादेन विना न लभ्यते —

"यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण ।
नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मात्" ॥

— इति नारायणश्रुतिः ।

"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनुं स्वाम्" ॥

— इति कठश्रुतिः (कठ उ. १.२.२३) ।

"तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्" ॥

— इति भगवद्वचनम् (भ.गी. १२.७) ।

"उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः ।
बन्धमोक्षौ च पुरुषाद्यस्मात् स हरिरेकराट्" ॥

— इति स्कान्दे ।

"अज्ञानां ज्ञानदो विष्णुः ज्ञानिनां मोक्षदश्च सः ।
आनन्ददश्च मुक्तानां स एवैको जनार्दनः" ॥

— इति च ।

"बन्धको भवपाशेन भवपाशाच्च मोचकः ।
कैवल्यदः परं ब्रह्म विष्णुरेव न संशयः" ॥

— इति च ।

प्रीतिश्च गुणोत्कर्षज्ञानादेव विशेषतो दृष्टा, न अभेदज्ञानात् ।
अभेदज्ञानादप्रीतिरेवोत्तमानां भवति ।

घातयन्ति हि राजानो, 'राजाऽहम्' इति वदन्ताम् । ददति च सर्वमभिप्रेतं गुणोत्कर्षं वदतः ।

"न तादृशी प्रीतिरीड्यस्य विष्णोर्गुणोत्कर्षज्ञातरि यादृशी स्यात् ।
तत्प्रीणनान्मोक्षमाप्नोति सर्वस्ततो वेदास्तत्पराः सर्व एव" ॥

— इति सौपर्णश्रुतिः ।

"यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत" ॥ (भ.गी. १५.१९)

— इति गुणोत्कर्षज्ञानादेव परमा प्रीतिर्भगवता स्वयमेवाभिहिता ।

अतो विष्णोर्गुणोत्कर्षे एव सर्वश्रुतिस्मृतीनां महातात्पर्यम् ।

न च 'अभेदे तात्पर्यम्' इत्यत्र किञ्चिन्मानम् ।

न च विशेषणविशेष्यतया भेदसिद्धिः । विशेषणविशेष्यभावश्च भेदापेक्षः । धर्मिप्रतियोग्यपेक्षया भेदसिद्धिः । भेदापेक्षं च धर्मिप्रतियोगित्वमित्यन्योन्याश्रयतया भेदस्यायुक्तिः — पदार्थस्वरूपत्वाद् भेदस्य ।

न च धर्मिप्रतियोग्यपेक्षया भेदस्यास्वरूपत्वं ऐक्यवत् स्वरूपस्यैव तथात्वात् ।

स्वरूपसिद्धावपि तदसिद्धिश्च जीवेश्वरैक्यं वदतः सिद्धैव ।

भेदस्तु स्वरूपदर्शन एव सिद्धः । प्रायः सर्वतो विलक्षणं हि पदार्थस्वरूपं दृश्यते ।

'अस्य भेद' इति तु 'पदार्थस्य स्वरूपम्' इतिवत् ।

यदि न स्वरूपं भेदस्तदा, पदार्थे दृष्टे प्रायः सर्वतो वैलक्षण्यं तस्य न ज्ञायते ।

अज्ञाते च वैलक्षण्ये 'आत्मनि घट' इत्यपि संशयः स्यात्? न हि कश्चित्तथा संशयं करोति ।

ज्ञात्वैव प्रायः सर्वतो वैलक्षण्यं कस्मिन्श्चिदेव सदृशे संशयं करोति ।

न हि आत्मनि 'अहं देवदत्तो, न वा?' इति कस्यचित् संशयो

भवति?

सामान्यतः सर्ववैलक्षण्ये ज्ञात एव घटत्वादिज्ञानम ।

अतो नान्योन्याश्रयता ।

न च युगपज्ज्ञानानुपत्तिर्दोषः — यथा युगपदेव दीपसहस्रदर्शने
सामान्यतः सर्वे ज्ञायन्त एव, तथा स्यात्?

एकस्मिन्नेव वस्तुनि विशेषस्तैरप्यङ्गीकृत एव — "नेति नेति" (बृ.उ. ४.३.६)
इत्यत्र सर्ववैलक्षण्याङ्गीकारात् । विशेषानङ्गीकारे च पुनरुक्तेः ।

न च घटाद्वैलक्षण्यमेव पटाद्वैलक्षण्यम्, अनुभवविरोधात् ।

तस्माद्, भेददर्शनं युक्तमेव ।

यच्च प्रमाणदृष्टानामपि पदार्थानां मिथ्यात्वकल्पनं तच्च
प्रमाणविरुद्धत्वादेव प्रकाशतस्करत्वम् ।

न हि प्रमाणदृष्टस्य तर्कबाध्यत्वं — प्रत्यक्षादिविरुद्धानां
तर्काभासत्वनियमात् ।

शुक्त्यादेः रजतत्वादिप्रतीतेरपि बलवत्प्रत्यक्षविरुद्धत्वादेव भ्रमत्वं, न
तर्कमात्रात् ।

तर्कमात्रेण प्रत्यक्षबाधने भूतचतुष्टयस्याबादेः पृथिवीत्वादृष्टेः
पृथिव्या अपि पृथिवीत्वं न स्यात्?

अतो न तर्कमात्रत एव दृष्टस्य भ्रान्तित्वं कल्प्यम् ।

अतः सर्वभेदनिरासकतर्कस्य सर्वश्रुतिस्मृतिप्रत्यक्षानुमानविरुद्धत्वात्
नितरां आभासत्वम् ।

न च 'परमार्थतो भेदाभावो, व्यावहारिकः सोऽस्ति' इति वाच्यम्,
सदसद्वैलक्षण्ये प्रमाणाभावात् ।

'असतः ख्याति अयोगाद्' इति वदतः ख्यातिरभूत्, न वा?
यदि न अभूत्, न तत्ख्यातिनिराकरणम् । यद्यभूत्, न तथापि ।

न चासतो वैलक्षण्यं तत्प्रतीतिं विना ज्ञायते ।

न च शुक्ते रजतत्वं सदसद्विलक्षणम् — 'असदेव रजतं प्रत्यभाद्' इत्यनुभवात् ।

न च प्रतीतत्वादसत्त्वाभावः ।

असतः सत्त्वप्रतीतिः सतोऽसत्त्वप्रतीतिरित्यन्यथाप्रतीतेरेव भ्रान्तित्वात् ।

न च 'असतो भ्रान्तावपि प्रतीतिर्नास्ति', इति वाच्यम्, अनिर्वचनीयपरमार्थत्वस्यासत एव दृष्ट्यङ्गीकारात् ।

न च तदप्यनिर्वाच्यं — अनवस्थितेः ।

'प्रथमानिर्वचनीयासिद्ध्या, सर्वानिर्वचनीयासिद्धिः' इति मूलक्षतिः ।

अनिर्वचनीयत्वे रजतस्य, 'अनिर्वचनीयमिदं रजतम्', इति बाधकज्ञानमुत्पद्येत?

मिथ्याशब्दस्त्वभाववाची ।

न च 'सदसद्वैलक्षण्यं नामास्ति', इत्यत्र किञ्चिन्मानम् ।

अनुभवविरोधश्च तत्पक्षे ।

सदसतोर्द्वयोरेव सर्वैरनुभूयमानत्वात् ।

अतोऽनिर्वचनीयाभावादसतः प्रतीत्यनङ्गीकारात् प्रतीयमानत्वाच्च भेदस्य सत्त्वप्राप्तेर्नाद्वितीयत्वं युज्यते ।

कथं च श्रुतिसिद्धो जीवपरमात्मभेदो निराक्रियते? मिथ्यावादित्वे च श्रुतेः कथमैक्यस्य सत्यत्वम्? कथं चैवंवादिनां वेदवादित्वम्?

वेदोक्तस्य मिथ्यात्वाङ्गीकारादेव हि अवेदवादित्वं बौद्धादीनामपि ।

अतो विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम् ।

कथं च जीवपरमात्मैक्ये सर्वश्रुतीनां तात्पर्यं युज्यते? सर्वप्रमाणविरुद्धत्वात् ।

तथा ह्यनुभवविरोधः — न हि 'अहं सर्वज्ञः, सर्वेश्वरो, निर्दुःखो, निर्दोषः' इति वा कस्यचिदनुभवः? अस्ति च तद्विपर्ययेणानुभवः ।

न च मिथ्यानुभवोऽयम् — तद्विपरीतप्रमाणाभावात् ।

न चाभेदे कश्चिदागमः । सन्ति च भेदे सर्वागमाः ।

तथा हि — "अतत्त्वमसि" (छा.उ. ६.८.७, ६.९.४, ६.१०.३, ६.११.३, ६.१२.३, ६.१३.३, ६.१४.३, ६.१५.३, ६.१६.३) इति नवकृत्वोपदेशः सदृष्टान्तकः । न चायं अभेदोपदेशः —

"स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वा
अन्यत्रायतनं अलब्ध्वा बन्धनमेवोपाश्रयते" (छा.उ. ६.८.२) ।
"सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः"
(छा.उ. ६.८.४) ॥१॥

"यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां
वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति । ते यथा
तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं
वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति
सम्पद्य न विदुः सति सम्पत्स्यामह इति । त इह व्यघ्रो वा सिंहो
वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको
वा यद्यद्भवन्ति तत् तदाभवन्ति" (छा.उ. ६.९.१-३) ॥२॥

"इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते
पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र
एव भवति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति ।
एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः
सत आगच्छामह इति त इह व्याघ्रो वा सिंहो वा
वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा
यद्यद्भवन्ति तत् तदाभवन्ति" (छा.उ. ६.१०.१-२) ॥३॥

"स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति । अस्य
यदेकां शाखां जीवो जहात्यथ सा शुष्यति" (छा.उ. ६.११.१-२) ॥४॥

"न्यग्रोधफलमत आहरेति इदं भगव इति भिन्द्धीति भिन्नं
भगव इति किमत्र पश्यसीति अण्व इव इमा धाना भगव इति
आसाम अङ्गैकां भिन्द्धीति भिन्ना भगव इति किमत्र पश्यसीति
न किञ्चन भगव इति । तं होवाच यं वै सोम्यैतमणिमानं

न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं
महान्यग्रोधस्तिष्ठति" (छा.उ. ६.१२.१-२) ॥ ५॥

"लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति स ह
तथा चकार तꣳ होवाच यद्दोषा लवणमुदकेऽवाधा अङ्ग
तदाहरेति तद्धावमृश्य न विवेद । यथा
विलीनमेवाङ्गास्यान्तादाचामेति कथमिति लवणमिति
मध्यादाचामेति कथमिति लवणमित्यन्तादाचामेति कथमिति
लवणमित्यभिप्रास्यैतदथ मोपसीदथा इति तद्ध तथा चकार
तच्छश्वत्संवर्तते तꣳ होवाचात्र वाव किल तत्सोम्य न
निभालयसेऽत्रैव किलेति" (छा.उ. ६.१३.१-२) ॥ ६॥

"यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं
ततोऽतिजने विसृजेत्" (छा.उ. ६.१४.१) ॥ ७॥

"अथ यदास्य वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः
परस्यां देवतायां तावन्न जानाति" (छा.उ. ६.१५.२) ॥ ८॥

"पुरुषꣳ सोम्योत हस्तगृहीतमानयन्ति अपहार्षीत्
स्तेयमकार्षीत् परशुमस्मै तपतेति । स यदि तस्य कर्ता
भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धो
अनृतेनात्मानमभिसन्धाय परशुं तप्तं प्रतिगृह्णाति स
दह्यतेऽथ हन्यते । अथ यदि तस्याकर्ता भवति ततेव
सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय
परशुं तप्तं प्रतिगृह्णाति सन दह्यतेऽथ मुच्यते"
(छा.उ. ६.१६.१-२) ॥ ९॥

— "एवमेव खलु सोम्य" (छा.उ. ६.६.२), "आचार्यवान्पुरुषो वेद"
(छा. ६.१४.२) इति स्थाननवकेऽपि भेद एव दृष्टान्ताभिधानात् ।

न हि शकुनिसूत्रयोर्नानावृक्षरसानां नदीसमुद्रयोर्जीववृक्षयोः
अणिमधानयोर्लवणोदकयोर्गन्धारपुरुषयोरन्नप्राणादिनियामकयोः
स्तेनापहार्ययोश्चैक्यम् ।

"सति सम्पद्य न विदुः सति सम्पत्स्यामह इति, त इह व्याघ्रो वा सिंहो वा"
(छा.उ. ६.९.१-३) इति, "सत आगम्य न विदुः सत आगच्छामह इति, त इह
व्याघ्रो वा सिंहो वा" (छा.उ. ६.१०.१-२) इति भेदापरिज्ञानेन अनर्थवचनाच्च ।

न हि गृहादागतस्य गृहे प्रविष्टस्य तदैक्यम् ।

"ताः समुद्रमेवापियन्ति स समुद्र एव भवति" इत्यत्रापि भेद एवोच्यते । अन्यथा 'तास्समुद्र एव भवन्ति' इति व्यपदेशः स्यात्?

अतो, नद्यः समुद्रादागच्छन्ति, तं प्रविशन्ति च, समुद्रस्तु स एव नैतासां समुद्रत्वं भवतीत्यर्थः ।

न हि भिन्नानां नदीजलपरमाणूनां समुद्राणुभिः ऐक्यं युज्यते ।

तथा सति महाजनसमितौ प्रविष्टानां द्वित्राणां तदैक्यं स्यात्?

न च तद्युज्यते — भेदेन अनुभवात् ।

"स्वꣳ ह्यपीतो भवति" (छा.उ. ६.८.१) इत्यत्रापि "स्व" इति परमात्मनोऽभिधानम्, "स्वात्मना चोत्तरयोः" (ब्र.सू. २.३.२०) इति सूत्रात् ।

"स्वातन्त्र्यात् स्व इति प्रोक्त आत्माऽयं चाततत्वतः ।
ब्रह्मायं गुणपूर्णत्वाद् भगवान् विष्णुरव्ययः" ॥

— इति परमोपनिषदि ।

"अपीत" इत्यपि प्रवेशमात्रम् — "स्वम्" इति द्वितीयानिर्देशात् ।

एकीभावविवक्षायां, 'स्वेन' इति निर्देशः स्यात्?

"स्वं कुलायं यथाऽपीतः पक्षी स्यादेवमीश्वरम् ।
अप्येति जीवः प्रस्वापे मुक्तौ चान्योऽपि सन् सदा" ॥

— इति च ।

"एवमेव खलु सोम्येतन्मनो दिशं दिशं पतित्वान्यत्र आयतनमलब्ध्वा प्राणमेवोपाश्रयते" (छा.उ. ६.८.२), इत्यत्रापि "मन" इति जीवः, "प्राण" इति परमात्मा — यत्रायं "पुरुषः स्वपिति नाम" (छा.उ. ६.८.१) इति तयोरेव प्रस्तुतत्वात् ।

"मननान्मनः उद्दिष्टः पुद्गलो निरयं गिरन् ।
कर्मानुशयनाच्चैव संसार्यनुशयी स्मृतः" ॥

— इति च ।

"प्राणः प्रणयनादेष साधुत्वात् सन् हरिः स्मृतः" इति च ।

"सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः"
(छा.उ. ६.८.४) इत्यत्रापि भेद एव प्रतीयते ।

"स्रष्टृत्वादाश्रयत्वाच्च मुक्तानां च प्रति प्रति ।
स्थापनाच्च विभुर्विष्णुरन्यः संसारिणो मतः" ॥

— इति च ।

"अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि"
(छा.उ. ६.३.२) इति, "स एष जीवेनात्मनानुप्रभूतः
पेपीयमानो मोदमानस्तिष्ठति" (छा.उ. ६.११.१) इत्यत्रापि
जीवशब्देन परमात्माऽभिहितः, "जीव इति भगवतोऽनिरुद्धस्याख्या"
इति श्रुतेः ।

"विष्णुर्जीव इति प्रोक्तः सततं प्राणधारणात् ।
स प्रविश्य शरीरं च स्थावरं जङ्गमं तथा ।
महाभूतानि च विभुस्त्रिवृत्करणपूर्वकम् ।
संसारिणं भ्रामयति सदैवान्यत्वलक्षणम् ।
तेनायं मोदते नित्यं वृक्षावस्थां गतोऽपि सन् ॥

— इति च ।

"तत्तेज ऐक्षत" (छा.उ. ६.२.३), "ता आप ऐक्षन्त" (छा.उ. ६.२.४),
"इमास्तिस्रो देवता" (छा. ६.३.२) इति पूर्वमेव चेतनत्वसिद्धेः, अनेन
"जीवेनात्मना" (छा.उ. ६.११.१) इति संसारिणः पुनः प्रवेशो न युक्तः ।

अतः, तत्र "जीव"शब्देन परमात्मैवाभिहितः ।

"जीवेनात्मनानुप्रभूतः पेपीयामानो मोदमानस्तिष्ठति" (छा.उ. ६.११.१)
इत्यत्रापि "जीव"शब्दोदितः पर एव । "पेपीयमानो मोदमानः" तु संसारी ।

न हि चेतनादन्यस्य मोदभोगादिकं युज्यते —

"सुखस्य चाप्यायतनं शरीरं दुःखस्य चाप्यायतनं शरीरम् ।
अचेतनं प्राकृतमेतदाहुः भोक्ता तयोश्चेतनकः शरीरी" ॥

— इति भारते ।

"जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते" (छा.उ. ६.११.३) इत्यत्रापि "जीव"शब्दः परे ।

न हि संसारिणो मुख्यतः प्राणधारकत्वं युज्यते —

"ब्रह्मणा त्यक्तदेहस्तु मृत इत्युच्यते नरः" इति च ।

"यं वै सोम्यैतमणिमानं न निभालयसे एतस्य वै सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति" (छा.उ. ६.१२.२) इत्यत्रापि "अणिम"शब्देन पर एवाभिहितः ।

"स य एषोऽणिमा एतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्माऽतत्त्वमसि श्वेतकेतो" (छा.उ. ६.८.७) इत्युक्तत्वाच्च ।

"धानासु त्वण्व्य इवेमा धाना" इति स्त्रीलिङ्गप्रयोगादिवशब्दप्रयोगाच्च नाणिमत्वम् । न च ता न निभालयसे ।

"ऐतदात्म्यम्" इत्येतदीयम् । "स आत्मा" इत्यात्मशब्दस्तु पर एव ।

"द्युभ्वाद्यायतनं स्वशब्दात्" (ब्र.सू. १.३.१), "नानुमानमतच्छब्दात्" (ब्र.सू. १.३.३), "प्राणभृच्च" (ब्र.सू. १.३.४) इत्यत्र "तमेवैकं जानथ आत्मानम्" (मु.उ. २.२.५), इति "स्व"शब्दपर्यायाऽत्मशब्दान्न प्रकृतिजीवावभिधीयते, किन्तु 'पर एव' इति भगवता व्यासेन अभिहितम् । अतः "आत्म"शब्दस्तस्मिन्नेव मुख्यः ।

"आततत्वाच्च मातृत्वादात्मेति परमो हरिः ।
आत्माभासास्तदन्ये ये न ह्येतेषां तता गुणाः" ॥

— इति परमोपनिषदि ।

"तेजः परस्यां देवतायां तावन्न जानाति" (छा.उ. ६.८.६ *) इत्यत्र च यदाऽस्य प्राणादीन् परो ग्रसति तदा न जानाति यदा ददाति तदा जानातीति तद्वशत्वमेवोक्तम् ।

"यदा प्राणान् ददातीशस्तदा चेतनकोऽखिलम् ।
जानाति ग्रस्तकरणस्तेन वेत्ति न किञ्चन" ॥

— इति च ।

"अपहार्षीत् स्तेयमकार्षीद्" (छा.उ. ६.१६.१) इत्यत्र च,
अन्याभिमतस्यैव वस्तुनोऽपहार्यत्वात् भेद एवायं दृष्टान्तः ।

अन्यं सन्तं परमात्मानं स्वयमिति मन्यमानः स्तेन एवेति, न हि
स्वकीयं परित्यजन् स्तेनो भवति ।

"ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः ।
शास्त्रतत्त्वमविज्ञाय तथा वादबलाज्जनाः ।
कामक्रोधाभिभूतत्वादहङ्कारवशं गताः ।
याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः ।
ब्रह्मस्तेना निरानन्दा अपक्वमनसोऽशिवाः ।
वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते ।
तेषां तमश्शरीराणां तम एव परायणम् ।
यतस्स्वरूपतश्चान्यो जातितः श्रुतितोऽर्थतः ।
कथमस्मि स इत्येव सम्बन्धः स्यादसंहितः" ॥

— इति मोक्षधर्मे (महा. १२.२६१.४७-५० *)

"यथा पक्षी च सूत्रं च नानावृक्षरसा यथा ।
यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा ।
यथा चोरापहायौ च यथा पुंविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ ।
तथापि सूक्ष्मरूपत्वान्न जीवात्परमो हरिः ।
भेदेन मन्ददृष्टीनां दृश्यते प्रेरकोऽपि सन् ।
वैलक्षण्यं तयोर्ज्ञात्वा मुच्यते बद्ध्यतेऽन्यथा ॥

— इति च परमोपनिषदि ।

"प्रेरकः सर्वजीवानां प्राणधीचोदिता च सः ।
विष्णुः संसारिणोऽन्यो यस्तमविज्ञाय मूढधीः ।
देहेन्द्रियप्राणबुद्धिनेतृत्वं मन्यते आत्मनः ।
अतस्संसारपदवीं याति जीवेशयोस्सदा ।
वैलक्षण्यं परं ज्ञात्वा मुच्यते बद्ध्यतेऽन्यथा" ॥

— इति च ।

सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयायेत्यात्मनो अन्यमनूचानत्वादिगुणप्रदं परमविज्ञाय स्तब्धस्य पराधीनत्व ज्ञापनेन स्तब्धतां निरस्य तन्निष्ठा हि अत्रोपदिश्यते ।

तद्वैक आहुः "असदेवेदमग्र आसीद्" (छा.उ. ३.१९.१) इत्यादि वादिप्रसिद्धमपि निराक्रियते ।

"इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः" (मु.उ. १.२.१०) इत्यादिवत् श्रुतितात्पर्यापरिज्ञानप्राप्तं च ।

दर्शितं च "ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः" (महा. १२.२६१.४७ *) इति ।

तद्वशत्वज्ञापनार्थं च सदेव सोम्येदमग्र आसीदित्यादि सृष्टिकथनम् ।

एकविज्ञानेन सर्वविज्ञानं च प्राधान्यात् किञ्चित्सादृश्यात्कारणत्वाच्च ।

न तु तदन्यस्य मिथ्यात्वात् ।

न हि सत्यज्ञानेन मिथ्याज्ञानं भवति । न हि 'शुक्तिज्ञो रजतज्ञः' इत्युच्यते, विरोधात् तयोर्ज्ञानयोः ।

'नेदं रजतम्' इति अरजतज्ञो हि शुक्तिज्ञो भवति ।

रजतज्ञश्चेन्न शुक्तिज्ञः । न हि तज्ज्ञस्तदभावज्ञो भवति । तदभावस्य तज्ज्ञानपूर्वकत्वं चान्यत्र तस्य सत्त्वादेव दृष्टम् ।

तदनङ्गीकारे तदेव न युज्यते ।

प्रधानज्ञानादप्रधानस्य ज्ञातवद्व्यपदेशोऽस्त्येव ।

यथा प्रधानपुरुषाणां ज्ञानाह्याननाशनैर्ग्रामो ज्ञात आहूतो नाशित इति व्यपदेशः ।

कारणे च पितरि ज्ञाते पुत्रो ज्ञात इति जानाम्येनमस्य पुत्रोऽयमिति व्यपदेश इति ।

एवमत्राप्येतत्सृष्टं सर्वमित्यादि ।

सादृश्याच्चैकस्त्रीज्ञानादन्यस्त्रीज्ञानमिति ।

तदेव सादृश्यमत्रापि विवक्षितम् — "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातꣳ स्याद्" (छा.उ. ६.१.४) इत्यादिना ।

अन्यथैकशब्दः पिण्डशब्दश्च व्यर्थस्स्यात् ।

मृदा विज्ञातयेत्येतावता पूर्णत्वात् ।

न ह्येकमृत्पिण्डात्मकान्यन्यमृन्मयानि ।

सादृश्यमेव हि तेषाम् ।

"यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातꣳ स्यात्" (छा.उ. ६.१.५), "यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातꣳ स्याद्" (छा.उ. ६.१.६) इत्यादिकमपि व्यर्थं स्यात्?

न हि एकमण्यात्मकमन्यल्लोहमयम् ।
न चैकनखकृन्तनात्मकं सर्वं कार्ष्णायसम् ।

"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छा.उ. ६.१.४) इत्यत्र च "वाचा" नाम्नां "आरम्भणम्" "विकारः" अविकृतं नित्यं "नामधेयम्" "मृत्तिकेत्येव" इत्येतद्वचनं सत्यं, इति श्रुत्यर्थः ।

न च "वाचारम्भण"शब्दोऽपि मिथ्यात्वे प्रसिद्धः ।

'वाचारम्भणमात्रम्' इति च अश्रुतकल्पनम् । तस्मिन्पक्षे, "नामधेय"शब्दः, "इति"शब्दश्च व्यर्थस्स्यात्?

अतो, न कुत्रापि जगतो मिथ्यात्वमुच्यते —

"कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः" (ई.उ. ८),

"यच् चिकेत॑ स॒त्यम् इत् तन् न मो॒घं वसु॑ स्पा॒र्हम् उ॒त जेतो॒त दाता॑" (ऋग्वेद १०.५५.६),

विश्वा॑ स॒त्यम् म॑घवाना यु॒वोर् इद् आप॑श् च॒न प्र मि॑नन्ति व्र॒तं वा॑म् (ऋग्वेद २.२४.१२),

"प्र घा न्व् अस्य महतो महानि सत्या सत्यस्य करणानि वोचम्"
(ऋग्वेद २.१५.१),

"अनाद्यनन्तं जगदेतदीदृक्प्रवर्तते नात्र विचार्यमस्ति ।
न चान्यथा क्वापि च कस्य चेदमभूत्पुरा नापि तथा भविष्यत्" ॥

"असत्यमाहुर्जगदेतदज्ञाः शक्तिं हरेर्ये न विदुः परां हि ।
यस्सत्यरूपं जगदेतदीदृक्सृष्ट्वा त्वभूत्सत्यकर्मा महात्मा" ॥

"असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥

एतां दृष्टिमवष्टभ्यः नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः" ॥ (भ.गी. १६.८-९)

— इत्यादेश्च ।

"अनित्यत्वत्वविकारित्वपारतन्त्र्यादिरूपतः ।
स्वप्नादिसाम्यं जगतो न तु बोधनिवर्त्यता ।
सर्वज्ञस्य यतो विष्णोः सर्वदैतत्प्रतीयते ।
बोधासहं ततो नैतत् किन्त्वाज्ञावशमस्य हि" ॥

— इति परमोपनिषदि ।

"प्रज्ञाविनिर्मितं यस्मादतो मायामयं जगत् ।
अनेनानुगतं यस्मादनृतं तेन कथ्यते ।
बोधानिवर्त्यमपि तु नित्यमेव प्रवाहतः ।
अ इत्युक्तः परो देवः तेन सत्यमिदं जगत् ।
तदधीनस्वरूपत्वादसत्यं तेन कथ्यते ।
सत्यस्य सत्यः स विभुरिन्द्रचापस्थ सूर्यवद्" ॥

— इति च ।

"तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्"
(बृ.उ. ४.१.२०)

— इति च ।

"महामायेत्यविद्येति नियतिर्मोहिनीति च ।

प्रकृतिर्वासनेत्येवं तवेच्छानन्त कथ्यते ।
प्रकृतिः प्रकृष्टकरणाद्वासना वासयेद्यतः ।
अ इत्युक्तो हरिस्तस्य विद्याऽविद्येति संज्ञिता ।
मायेत्युक्त्वा प्रकृष्टत्वात् प्रकृष्टं हि मयाभिधम् ।
विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्यते ।
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा" ॥

— इति च ।

"सर्वे वेदा हरेर्भेदं सर्वस्मात् ज्ञापयन्ति हि ।
भेदः स्वातन्त्र्यसार्वज्ञ्यसर्वैश्वर्यादिकश्च सः ।
स्वरूपमेव भेदोऽयं व्यावृत्तिश्च स्वरूपता ।
सर्वव्यावृत्तये यस्मात् स्वशब्दोऽयं प्रयुज्यते ।
सर्वव्यावृत्ततामेव नेति नेत्यादिका श्रुतिः ।
विष्णोरतो वदेदन्या अपि सर्वा न संशयः" ॥

— इति नारायणश्रुतिः ।

"अहं ब्रह्मास्मि" (बृ.उ. ३.४.१०),
"तद्योऽहं सोऽसौ योऽसौ सोऽहम्",
"योऽसावादित्ये पुरुषः सोऽहमस्मि स एवाहमस्मि"

— इत्यादि तु अन्तर्याम्यपेक्षया ।

"स यश्चायं पुरुषे यश्चासावादित्ये स एकः" (तै.उ. २.८.५, ३.१०.४) ।

"अः इति ब्रह्म, तत्रागतमहमिति" (ऐ.आ. २.३.६), तस्योपनिषद् "अहम्" इति ।

"अहंनामा हरिर्नित्यं अहेयत्वात्प्रकीर्तितः ।
त्वं चासौ प्रतियोगित्वात्परोक्षत्वात्स इत्यपि ।
सर्वान्तर्यामिणि हरावस्मच्छब्दविभक्तयः ।
युष्मच्छब्दगताश्चैव सर्वास्तच्छब्दगा अपि ।
सर्वशब्दगताश्चैव वचनान्यखिलान्यपि ।
स्वतन्त्रत्वात्प्रवर्तन्ते व्यावृत्तेऽप्यखिलात्सदा ।
तत्सम्बन्धात्तु जीवेषु तत्सम्बन्धादचित्स्वपि ।
वर्तन्त उपचारेण तिङ्पदान्यखिलान्यपि ।
तस्मात्सर्वगतो विष्णुरेको भिन्न ततो बहुः" ॥

— इति नारायणश्रुतिः ।

"सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम्" ॥ (भ.गी. १८.२०)

— इति भगवद्वचनम् ।

न चासत्यो भेदः —

"सत्यम् एनम् अनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः"
(ऋग्वेद ४.१७.५),

"सत्यः सो अस्य महिमा गृणि शवो यज्ञेषु विप्रराज्ये" (ऋग्वेद ८.३.४),

"सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा ।
मैवारुवण्यो मैवारुवण्यो मैवारुवण्यः",

"आत्मा हि परमस्वतन्त्रः सर्ववित् सर्वशक्तिः परमसुखः परमो
जीवस्तु तद्वशः अल्पज्ञः अल्पशक्तिः आर्तः अल्पकः",

— इत्यादिश्रुतिभ्यः ।

न चावान्तरसत्यत्वमिदम् —

"यो वेद निहितं गुहायां परमे व्योमन् ।
सोऽश्नुते सर्वान् कामान्त्सह ब्रह्मणा विपश्चिता" ॥ (तै.उ. २.१)

"एतमानन्दमयमात्मानमुपसङ्क्रम्य इमाँल्लोकान्कामान्नी कामरूप्यनुसञ्चरन् ।
एतत् साम गायन्नास्ते" । (तै.उ. ३.१०.५)

"ऋचां त्वः पोषम् आस्ते पुपुष्वान् गायत्रं त्वो गायति शङ्करीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः" ॥
(ऋग्वेद १०.७१.११)

"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" (छा.उ. ८.३.४),

"स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा
ज्ञातिभिर्वाऽज्ञातिभिर्वा" (छा.उ. ८.१२.३),

"यत्र त्वस्य सर्वमात्मैवाभूत्" "तत्केन कं पश्येत्"

"तत्केन कं जिघ्रेत्" "तत्केन कं विजानीयाद् येनेदं सर्वं
विजानाति तं च केन विजानीयात् विज्ञातारमरे केन विजानीयात्"
(बृ.उ. ४.४.१४),

"यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति" (क.उ. २.१.१५),

"तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" (मु.उ. ३.१.३),

"अमृतस्यैष सेतुः" (मु.उ. २.२.५),

"अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्व् असमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥
(ऋग्वेद १०.७१.७)

"ईशमाश्रित्य तिष्ठन्ति मुक्ताः संसारसागरात् ।
यथेष्टभोगभोक्तारो ब्रह्मान्ता उत्तरोत्तरम्" ॥

— इति मोक्षानन्तरं भेदश्रुतिभ्यः ।

"इदं ज्ञानमपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रळये न व्यथन्ति च" ॥ (भ.गी. १४.२)

— इति भगवद्वचनम् ।

"ॐ जगद्व्यापारवर्जम् ॐ" (ब्र.सू. ४.४.१७),
"ॐ प्रकरणादसन्निहितत्वाच्च ॐ" (ब्र.सू. ४.४.१८)

— इत्यादि च ।

"अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा" (बृ.उ. ४.५.१४) इति
तद्धर्माणामप्यनुच्छित्तेः प्रस्तुतत्वात् ।

अत्रैव "मा भगवान् मोहान्तमापिपन्", "न प्रेत्य सञ्ज्ञाऽस्ति"
(बृ.उ. ४.४.१२) इति सञ्ज्ञानाशस्य दोषत्वेनोक्तत्वात् ।

"यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येद्" (बृ.उ. ४.४.१४) इति ह्याक्षेप एव । न हि भोगाभावो "विज्ञातारमरे केन विजानीयाद्" इति विज्ञातुरविज्ञानं चापेक्षितम् ।

"अहमित्येव यो वेद्यः स जीव इति कीर्तितः ।
स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोः" ॥

— इति परमश्रुतिः ।

"मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्" (महा. १२.२९०.७९)

— इति मोक्षधर्मे ।

"न तु तद्द्वितीयमस्ति" इति च ।

"यत्तद्ब्रह्म द्वैतत्वेन न पश्यति तदेव द्वितीयं नेत्याह ।
यत्ततोऽन्यद्विभक्तत्वेनैव पश्येद्" इति वाक्यशेषात् ।

न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति हेतोश्च ।

"कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति" (मु.उ. ३.२.७)
इत्यत्रापि एकीभावो मत्यैक्यं क्षीराब्ध्यादिस्थिततदूपापेक्षया स्थानैक्यं वा ।

"कामेन मे काम आगात् हृदयाद्धृदयं मृत्योः ।
यदमीषामदः प्रियं तदैतूपमामभि ।
ब्रह्ममत्यनुकूला मे मतिर्मुक्तौ भविष्यति ।
अतः प्रायोनुकूलत्वमिदानीमपि मे स्थितम्" ॥

"येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम्",
"एतमानन्दमयमात्मानमुपसङ्क्रामति" (तै.उ. २.७)

— इत्यादिश्रुतिभ्यः ।

स्वरूपैक्याभिप्राये "कर्माणि विज्ञानमयश्च" (मु.उ. ३.२.७) इति न युज्यते ।
न हि तत्पक्षेऽपि कर्मणां ब्रह्मैक्यं मुक्तावस्ति ।

निवृत्त्यभिप्राये च पञ्चदशकलानामपि समत्वात् ।

"गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु"
(मु.उ. ३.२.७) इत्यन्यासां कलानां गमनमुक्त्वा कर्मणां
विज्ञानात्मनश्चैकीभावकथनं स्यात् विशेषाभावात् ।

न च ज्ञाननिवृत्तस्य रजतस्य शुक्त्यैकीभावव्यवहारोऽस्ति ।

"परेऽव्यये" (मु.उ. ३.२.७) इत्यधिकरणत्वकथनं च भेदज्ञापकम् ।

अन्यथा, 'पर एव भवन्ति' इति निर्देशः स्यात्?

"जीवस्य परमैक्यं तु बुद्धिसारूप्यमेव तु ।
एकस्थाननिवासो वा व्यक्तिस्थानमपेक्ष्य सः ।
न स्वरूपैकता तस्य मुक्तस्यापि विरूपतः ।
स्वातन्त्र्यपूर्णतेऽल्पत्वपारतन्त्र्ये विरूपते" ॥

— इति परमश्रुतिः ।

"ब्रह्म वेद ब्रह्मैव भवति" (मु.उ. ३.२.९) इत्यादि च "सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेद्" इतिवद् 'बृंहितो भवति' इत्यर्थः
— न हि ब्राह्मणपूजकः स एव ब्राह्मणो भवति ।

"ब्रह्माणि जीवाः सर्वेऽपि परब्रह्माणि मुक्तिगाः ।
प्रकृतिः परमं ब्रह्म परमं महदच्युतः ।
तस्मान्न मुक्ता न च सा न क्वचिद्विष्णुवैभवम् ।
प्राप्नुवन्ति स एवैकः स्वतन्त्रः पूर्णषड्गुणः" ॥

— इति परमश्रुतिः ।

"परो मात्रया तन्वा वृधान न ते महित्वम् अन्व् अश्नुवन्ति",
(ऋग्वेद ७.९९.१)

"ब्रह्मेशानादिभिर्देवैः यत्प्राप्तुं नैव शक्यते ।
तद्यत्स्वभावः कैवल्यं स भवान्केवलो हरे" ॥

— इति च ।

"यथापियन्ति तेजांसि महातेजसि भास्करे ।
पृथक्पृथक् स्थितान्यह्नि स्वरूपैरपि सर्वशः ।
परे ब्रह्मणि जीवाख्यब्रह्माण्यप्यपियन्ति हि ।
मुक्तौ पृथक् स्थितान्येव तदन्येषामदर्शनम् ।
अप्ययोऽयं समुद्दिष्टो न स्वरूपैकता क्वचिद्" ॥

— इति नारायणश्रुतिः ।

अतः सर्वागमविरुद्धमेव जीवेश्वरैक्यम् ।

तथैव सर्वयुक्तिविरुद्धं च ।

न तावदेकजीववादो युज्यते ।

एकाज्ञानपरिकल्पितत्वे च 'सर्वस्य सर्वमिदं परिकल्पितम्' इति जानतः पुनः शिष्यादिबोधनं न युज्यते ।

न हि 'स्वप्नोऽयम्' इति निश्चित्य स्वाप्नपुत्रदायार्थं यतते?

स्वप्ने तु स्वाप्नत्वाज्ञानादेव यतते ।

न च बहूनां दृश्यमानत्वादस्य 'अज्ञानपरिकल्पितमिदम्' इति निश्चयो युज्यते ।

स्वप्ने तु प्रबोधानन्तरमेकस्यावशिष्टत्वान्निश्चयः । न चात्र तथास्ति ।

'तस्य तस्य तथा तथा प्रतिपत्तव्यम्' इत्यङ्गीकारे, वस्तुनि विकल्पासम्भवात्, 'अकल्पितम्' इत्येव स्यात्?

न च 'तथा प्रतिपत्तव्यम्' इत्यत्र प्रमाणमस्ति ।

'शिष्याज्ञानपरिकल्पितम्' इत्यङ्गीकारे तस्यैवाचार्यभावे 'स्वयमेव कल्पितो भवति' इति सम्यग् ग्रन्थाधिगमस्यैव अनर्थहेतुत्वं स्यात्?

न च कस्यचिन्मुक्तिः — ग्रन्थाधिगमे, तस्यैव शिष्याज्ञानपरिकल्पितत्वप्राप्तेः ।

स चैकजीवो यदि भेदवादि भवति, तस्य तत्रैव दार्ढ्यात्, 'न कदाचिद् भेदनिवृत्तिः', इति न कस्यापि मुक्तिः स्यात्?

'तेन यथा कल्पितं तथैव भवति' इति तेनैकजीववादिनां नित्यनिरयकल्पने, स एव स्यात्?

न च 'एकजीवाज्ञानपरिकल्पितं समस्तम्' इत्यत्र किञ्चिन्मानम् ।

"प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतं अद्वैतं परमार्थतः" ॥ (मा.उ. १.२.९)

— इत्यस्य चायमर्थः — प्रपञ्चो यदि "विद्येत" भवेत उत्पद्येत,
तर्हि "निवर्तेत" । न च निवर्तते — तस्माद् अनादिरेवायम् ।

'प्रकृष्टः पञ्चविधो भेदः' — "प्रपञ्चः" ।

न च अविद्यमानोऽयं — मायामात्रत्वात् ।

"माया" इति भगवत्प्रज्ञा, सैव मानत्राणकर्त्री यस्य, तन्"मायामात्रम्" ।

'परमेश्वरेण ज्ञातत्वाद्रक्षितत्वाच्च न द्वैतं भ्रान्तिकल्पितम्' इत्यर्थः
— न हि ईश्वरस्य भ्रान्तिः ।

तर्हि, "अद्वैतः सर्वभावनाम्" (मा.उ. १.२.२) इति व्यपदेशः कथम्?
इत्यत आह — "अद्वैतं परमार्थतः" (मा.उ. १.२.९) इति ।

परमार्थतापेक्षया हि 'अद्वैतं सर्वस्मादुत्तमोऽर्थः स एक एव' इत्यर्थः ।

अन्यथा हि "अद्वैतः सर्वभावानाम्" (मा.उ. १.२.२) इति व्यर्थं स्यात्?

"सर्वभावानां" मध्ये, तस्यैकस्येव 'अद्वैतत्वम्' इत्युक्ते
समाधिकराहित्यमेवोक्तं स्यात्? अन्येषां सर्वभावानां च
समाधिकभावः ।

"विकल्पो विनिवर्तेत कल्पितो यदि केनचिद्" (मा.उ. १.२.१०)
इति वाक्यशेषाच्च 'न कल्पितत्वमस्य' इति ज्ञायते ।

'निवर्तते' इत्यङ्गीकारे "निवर्तेत" "विद्येत" इति च
प्रसङ्गरूपेण कथनं "यदि"शब्दौ च न युज्यन्ते ।

"विद्येत" इत्यस्य चोत्पत्त्यर्थानङ्गीकारे 'यद्यदस्ति तत्तन्निवर्तते'
इति व्याप्त्यभावात् "निवर्तेत" इति न युज्यते ।

अतः प्रपञ्चस्यानादिसत्यत्वपरमिदं वाक्यम् ।

अतः "उपदेशादयं वादोऽज्ञाते द्वैतं न विद्यते" (मा.उ. १.२.१०)
इत्याह । अज्ञात एव "द्वैतं न विद्यते" । 'अज्ञानिनां पक्ष एव द्वैतं
न विद्यत', इत्यर्थः ।

"जीवेश्वरभिदा चैव जडेश्वरभिदा तथा ।
जीवभेदो मिथश्चैव जडजीवभिदा तथा ।
मिथश्च जडभेदो यः प्रपञ्चो भेदपञ्चकः ।
सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात् ।
न च नाशं प्रयात्येष न चासौ भ्रान्तिककल्पितः ।
कल्पितश्चेन्निवर्तेत न चासौ विनिवर्तते ।
द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम् ।
मतं हि ज्ञानिनामेतन्मितं त्रातं च विष्णुना ।
तस्मात्सत्यमिति प्रोक्तं परमो हरिरेव तु" ॥

— इति परमश्रुतिः ।

मैत्रेयीशाखायां (मैत्रायणी उ. ७.८ *) च "अथ ज्ञानोपसर्गाः" इत्युक्त्वा, "अथ ये चान्ये मिथ्यातर्कैः दृष्टान्तैः कुहकेन्द्रजालैः वैदिकेषु परिस्थातुमिच्छन्ति तैः सह न संवसेत् प्राकाश्या ह्येते तस्करा अस्वर्ग्या" इत्याह ।

"नैरात्म्यवादकुहकैर्मिथ्यादृष्टन्तहेतुभिः ।
भ्राम्यँल्लोको न जानाति वेदविद्यान्तरं तु यत्" ॥

— इति ।

'आत्मसम्बन्धि किमपि नास्ति' इति वादो, "नैरात्म्यवादः" ।

भ्रान्तिकल्पितत्वे च जगतः, सत्यं जगद्द्वयमपेक्षितम् ।

न हि सत्यशुक्तेः, सत्यरजतस्य, तयोस्सादृश्यस्य, चाभावे भ्रान्तिर्भवति ।

स्वप्नेऽपि वासनारूपं सत्यमेव जगन्मनसि स्थितं बहिष्ठत्वेन दृश्यते ।

देहात्मनोरपि एकदेशस्थत्वादिसादृश्यमस्त्येव ।

'शङ्खः पीतो, नभो नीलम्' इत्यादिष्वपि पीतादयोऽन्यत्र विद्यन्त एव ।

तत्सादृश्यं च द्रव्यत्वादिकं किञ्चित् शङ्खादीनां चास्त्येव । अतो न कुत्रापि सदृशसत्यवस्तुद्वयं विना भ्रमः ।

न च आत्मनि अनात्मभ्रमः क्वापि दृष्टः । न हि कश्चिद् 'अहं, अहं न भवामि' इति भ्रान्तो दृश्यते?

आत्मन्यनात्मभ्रम एवायं प्रपञ्च इति तैरुच्यते ।

तं विनैवानात्मन्यात्मभ्रमकल्पनेऽनात्मनस्सत्यत्वं स्यात् ।

तदा चाद्वितीयत्वकल्पनेऽनात्मैवास्ति नात्मेति भवति ।

आत्माज्ञानात्मकत्वे च जगतः आत्मनो भिन्नत्वेन न दृश्येत ।

न हि शुक्तेर्भेदेन रजतं दृश्यते भ्रान्तौ ।

न चैकमेव युगपद्बहुधा दृश्यते भ्रान्तौ ।

न चात्मनि भेदभ्रमः क्वापि दृष्टः ।

न च कुत्रापि मिथ्योपाधिकृतो भेदो दृष्टः ।

न च ज्ञानाज्ञानयोरपि मिथ्याकल्पितत्वं दृष्टम् ।

तद्विषयस्यैवान्यथात्वं भ्रान्तौ ।

एवमाद्यनन्तयुक्तिविरुद्धोऽयं पक्षः ।

ग्रन्थबहुत्वं स्यादित्येवोपरम्यते ।

न च सत्यत्वाङ्गीकारे कश्चिद्दोषः ।

बहुजीववादिपक्षेऽपि भेदस्य मिथ्यात्वाङ्गीकारे एते दोषाभवन्त्येव ।

मिथ्योपाधिकृतं हि तेषामपि बहुत्वम् ।

न च मिथ्योपाधिकृतो भेदः क्वापि दृष्टः ।

आत्मन्यनात्मकल्पनारूपत्वान्मिथ्योपाधिरेव न युज्यते ।

मायामयी सृष्टिरपि तत्सदृशस्यान्यस्य विद्यमानत्व एव दृष्टा ।

द्रव्यत्वादिसादृश्ययुतं किञ्चिदधिष्ठानमाश्रित्यैव च ।

"अधिष्ठानं च सदृशं सत्यवस्तुद्वयं विना ।
न भ्रान्तिर्भवति क्वापि स्वप्नमायादिकेष्वपि ।
मानस्यां वासनायां तु बहिर्वस्तुत्वकल्पनम् ।
स्वाप्नो भ्रमश्च मायायां कर्तृदेहादिवस्तुषु ।
चतुरङ्गबलत्वादिकल्पनं भ्रम इष्यते ।
न भ्रान्तिकल्पितं विश्वमतो विष्णुबलाश्रितम्" ॥

— इति ब्रह्मवैवर्ते ।

"न च मायाविना माया दृश्यते विश्वमीश्वरः ।
सदा पश्यति तेनेदं न मायेत्यवधार्यताम्" ॥

— इति च ।

"अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत् ।
सर्वापरोक्षविद्विष्णुर्विश्वदृक्तन्न तन्मृष" ॥

— इति च ।

यदि चैकमेव ब्रह्मोपाधिभेदात्संसरति मुच्यते च तदा संसारिणां
सर्वदा विद्यमानत्वात् सर्वदा संसार्येव ब्रह्म ।

अतस्तद्भावोऽपि न मुक्तिः सर्वदोपाधिसम्बन्धत्वात् तस्य ।

न च 'शुद्धस्य नोपाधिसम्बन्ध', इति वाच्यम् ।
उपाधिसम्बन्धस्योपाधिसम्बन्धकल्पनेऽनवस्थाप्रसङ्गात् ।

न च तेनैव सम्बन्धेन सम्बद्धस्य आत्माश्रयप्रसङ्गात् ।

इतश्च मिथ्योपाधिः न युज्यते — अज्ञानसिद्धौ मिथ्योपाधिसिद्धिः, अज्ञानं विना
मिथ्यात्वासिद्धेः ।

न च मिथ्योपाधिं विनाऽज्ञानसिद्धिः, मिथ्योपाधिभिन्नस्यैव अज्ञत्वात् ।

शुद्धस्यैवाज्ञत्वे मुक्तस्याप्यज्ञत्वप्रसक्तेः, स्वाभाविकत्वात् सत्यत्वात्
सद्वितीयत्वप्रसक्तेश्च ।

स्वाभाविकस्य चानिवृत्त्यङ्गीकारादनिवृत्तप्रसक्तेश्च — सत्यस्य अनिवृत्तिरिति हि तत्पक्षः ।

अतश्चान्योन्याश्रयता, 'अज्ञानसिद्धौ मिथ्योपाधिसिद्धिः, मिथ्योपाधिसिद्धौ जीवसिद्धिः, जीवसिद्धौ तदाश्रयाज्ञानसिद्धिः' इति चक्रकं वा ।

'न च शुद्धमेव भ्रान्त्या अज्ञम्' इति युक्तम्, 'अज्ञानसिद्धौ भ्रमसिद्धिः, तत्सिद्धौ अज्ञानसिद्धिः' इति अन्योन्याश्रयत्वात् ।

"अनागता अतीताश्च यावन्तः सहिताः क्षणाः ।
अतीतानागताश्चैव यावन्तः परमाणवः ।
ततोऽप्यनन्तगुणिता जीवानां राशयः पृथग्" ॥

— इति वत्सश्रुतेर्न संसारिणां परिसमाप्तिरस्मत्पक्षे ।

"परमाणुप्रदेशेऽपि ह्यनन्ताः प्राणिराशयः ।
सूक्ष्मत्वादीशशक्त्यैव स्थूला अपि हि संस्थिताः ।
सहस्रयोजनसभां प्रभावाद्विश्वकर्मणः ।
अनन्ता राशयोऽनन्ताः प्रजानामधिसंस्थिता" ॥

— इति स्कान्दे ।

न च मिथ्यावस्तुनो दुर्घटत्वमेव भूषणम् ।

दृष्टस्य वस्तुनो मिथ्यात्वकल्पनस्य दृष्टिसकाशात् बलवत्प्रमाणयुक्त्यपेक्षत्वात् ।

तदभावे सत्यत्वं दृष्ट्यैव सिद्ध्यति ।

न हि अन्नादिकं भोग्यं दृष्ट्वा भोक्तुं सत्यत्वे प्रमाणान्तरमपेक्षते । किन्तु 'नेदं अन्नम्' इति केनचिदुक्ते 'कथं इदं, अन्नत्वेन दृश्यमानं, अन्नं न भवति?' इति प्रमाणान्तरमपेक्षते ।

न च प्रत्यक्षदृष्टस्य ततो बलवत्प्रत्यक्षमागमं विना अनुमानादिनैव बाधो दृष्टः ।

दूरस्थवृक्षह्रस्वत्वादौ प्रत्यक्षापटुत्वस्य निश्चितत्वात् युक्त्या तत्र दीर्घत्वनिश्चयः ।

प्रत्यक्षस्य हि दूरे मन्दग्राहित्वं परिमाणादौ अन्यथात्वं च
ततो बलवत्प्रत्यक्षेणैव निश्चितम् ।

न च जगत्प्रत्यक्षस्य मिथ्यात्वं केनापि प्रमाणेन निश्चितम् ।

विशेषतश्च ज्ञानाज्ञानसुखदुःखात्मभेदादिविषयस्यानुभवस्य न
मिथ्यात्वं दृष्टम् ।

अतश्च संसारस्य सत्यत्वात्सत्यस्य चानिवृत्त्यङ्गीकारान्न मोक्षः
स्यात् ।

अनुभवसिद्धस्य बलवदनुभवं विना युक्तित एव मिथ्यात्वाङ्गीकारे
आत्मनोऽपि मिथ्यात्वं स्यात् ।

युक्तिश्च सर्वस्यान्यस्य मिथ्यात्वाङ्गीकारात् ।

द्विधाकल्पने कल्पनागौरवमिति ।

आत्माधिष्ठानभ्रमस्यैव असिद्धेः, तस्याधिष्ठानत्वमपि न युज्यते ।

दुर्घटस्य च भूषणत्वे दुर्घटमपि आत्मामिथ्यात्वं स्यादेव ।

प्रतीतेरपि अविद्याकार्यत्वाङ्गीकारात्, तस्याश्च दुर्घटत्वस्य भूषणत्वात्
सत्यस्य च युक्तयपेक्षत्वात् घटादीनां द्रष्टृत्वमात्मनश्च जडत्वं द्रष्टुरभावे
च प्रतीतिरधिष्ठानं विनैव भ्रमः इत्यादि विरुद्धं सर्वमपि स्यात्?

उपाधिभेदाङ्गीकारे हस्तपादाद्युपाधिभेदेऽपि तद्गतसुखदुःखादिभोक्तुर्यथा
भेदो न प्रतीयते एवमेव शरीरादिभेदेऽपि भोक्तुर्भेदो न दृश्येत ।
सर्वदेहगतसुखदुःखादिकमेकेनैव भुज्येत ।

यथा च एकाङ्गुल्यादि अपगमेऽपि न मुक्तिरेवमेकोपाध्यपगमेऽपि
तस्यैवानन्तोपाधिसम्बद्धत्वान्न मुक्तिस्स्यात् ।

"उद्यतायुधदोर्दण्डाः पतितस्वशिरोऽक्षिभिः ।
पश्यन्तः पातयन्ति स्म कबन्धा अप्यरीन् युधि" ॥

— इति भारतवचनात् न विश्लेषाद्विशेषः ।

किञ्च उपाधिः आत्मन एकदेशं ग्रसति, उत सर्वमात्मानम्?

एकदेशाङ्गीकारे सावयवत्वम् । सावयवस्य चानित्यत्वं तैरङ्गीकृतम् ।
सर्वग्रासे च नोपाधिर्भेदकः स्यात् । उपाधिकृतांशकल्पने
तदुपाधिकृतत्वे आत्माश्रयत्वम् । उपाध्यन्तरकल्पनेऽनवस्था ।

न चेश्वरस्य सर्वगतत्वादौपाधिकभेदो ब्रह्मणा भवति ।

न हि देशतः कालतश्चापरिच्छिन्नयोरौपाधिकभेदो दृष्टः ।

सर्वोपाधिगतत्वाच्चैकस्यैव ईश्वरस्य भेदस्य मिथ्यात्वाद्धस्तपादादिभेदेऽपि
भोक्तुरेकत्ववत् सर्वसुखदुःखादिभोक्तृत्वमीश्वरस्यैव स्यात् ।

देशतः कालतश्चापरिच्छिन्नयोरौपाधिकभेदाभावादेव दुःखिनोऽन्यत्
शुद्धं ब्रह्म न सिद्ध्यति ।

अतः स्वाभाविकसंसार इत्यनिवृत्तिरेव स्यात् ।

किञ्च विशिष्टस्य, शुद्धस्य वा संसारः?

शुद्धस्य संसार इत्युक्ते स्वव्याहतिः । विशिष्टस्येत्युक्ते विशिष्टोऽन्यः स एव वा ।

स एव चेदुक्तो दोषः ।

अन्यश्चेन्नित्योऽनित्यो वा ।

अनित्यश्चेन्नाश एव तस्य न मोक्षः ।

नित्यत्वे च भेदस्य सत्यत्वं मोक्षेऽपि तस्य भावात् ।

स्वरूपमात्रस्याभेदः उपाधिभिन्न एवेत्यङ्गीकारे स्वरूपमेवोपाधिसम्बद्धमिति
न तस्य शुद्धत्वम् ।

अशुद्धस्वभावस्य न कदाचिच्छुद्धत्वमिति च तत्पक्षः ।

उपाधिमिथ्यात्वाङ्गीकारे चान्योन्याश्रयत्वादिदोषाः उक्ताः ।

न च अनादिकर्मभेदाद् भेदः । 'औपाधिकभेदसिद्धौ
कर्मभेदसिद्धिः, तत्सिद्धौ च तत्सिद्धिः' इत्यन्योन्याश्रयत्वात् ।

अतोऽनन्तदोषदुष्टत्वाद् ग्रन्थबहुत्वं स्यादित्येवोपरम्यते ।

अतः सर्वप्रमाणविरुद्धत्वात् न अभेदे श्रुतितात्पर्यम् ।

सर्वशब्दावाच्यस्य लक्षणापि न दृष्टेति न तस्य शास्त्रगम्यत्वम् ।

अतोऽवाच्यत्वादज्ञेयत्वाच्छून्यमेव तदिति प्राप्तम् ।

न च स्वेनापि ज्ञेयत्वं तैरुच्यते । कर्तृकर्मविरोध इति हि ते वदन्ति ।

न च स्वरूपं अन्यद्वा ज्ञेयं ज्ञातारं च विना ज्ञानं दृष्टम् ।

अतो ज्ञातृज्ञेयाभावात् ज्ञानस्यापि शून्यतैव ।

अतः शून्यवादात् न कश्चिद्विशेषः ।

न च ज्ञातृज्ञेयरहितं ज्ञानं क्वापि दृष्टम् ।

अप्राप्तत्वाच्चेश्वरभेदस्य नाभेदे श्रुतितात्पर्यं युज्यते ।

"सर्वोत्तमं सर्वदोषव्यपेतं गुणैरशेषैः पूर्णमन्यं समस्तात् ।
वैलक्षण्याज्ज्ञापयितुं प्रवृत्ताः सर्वे वेदा मुख्यतो नैव चान्यत्" ॥

— इति महोपनिषदि ।

अतः सदागमैरेव सर्वस्माद्भिन्नत्वेन सर्वस्माद्विशिष्टत्वेन च विज्ञेयो भगवान्नारायण इति सिद्धम् ॥

॥ इति प्रथमः परिच्छेदः॥

॥ द्वितियः परिच्छेदः॥

ॐ ॥ "ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात्क्षराः ।
लक्ष्मीरक्षरदेहत्वाद् अक्षरा तत्परो हरिः ।
स्वातन्त्र्यशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः ।
निस्सीमत्वेन ते सर्वे तद्वशाः सर्वदैव च ।
सर्गस्थितिक्षययतिप्रकाशावृतिबन्धनम् ।
सर्वक्षराणामेकः स कुर्यात् सात्विकमोक्षणम् ।
सर्गस्थितियतिज्योतिर्नित्यानन्दप्रदोऽक्षरे ।
चेष्टाप्रदश्च सर्वेषामेक एव परो हरिः ।
तस्य नान्योऽस्ति सर्गादिकर्ता निर्दोषकश्च सः" ॥

— इति परमश्रुतिः ।

"ब्रह्मशेषसुपर्णेशशक्रसूर्यगुहादयः ।
सर्वे क्षरा अक्षरा तु श्रीरेका तत्परो हरिः" ।

— इति स्कान्दे ।

"यं कामये तं-तम् उग्रं कृणोमि तम् ब्रह्माणं तम् ऋषिं तं सुमेधाम् ।
अहं रुद्राय धनुर् आ तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्य् अहं द्यावापृथिवी आ विवेश ।
अहं सुवे पितरम् अस्य मूर्धन् मम योनिर् अप्स्व् अ १ न्तः समुद्रे" ॥
(ऋग्वेद १०.१२५.५-७)

"यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः ।
यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यचसर्ज भूम्याम् ।
यदोषधीभिः पुरुषान् पशूंश्च विवेश भूतानि चराचराणि ।
अतः परं नान्यदणीयसं हि परात्परं यन्महतो महान्तम् ।
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ।
तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्" ॥
(म.ना.उ. १.३-६)

"अस्य देवस्य मीळ्हुषो वया विष्णोर् एषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियम् महित्वं यासिष्टं वर्तिर् अश्विनाव् इरावत्" ॥ १.६१॥
(ऋग्वेद ७.४०.५)

"चन्द्रमा मनसो जातश् चक्षोः सूर्यो अजायत ।
मुखाद् इन्द्रश् चाग्निश् च प्राणाद् वायुर् अजायत" ॥
(ऋग्वेद १०.९०.१३)

"एको नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावपृथिवी" ।
(महोपनिषद् १.१.१)

"एको नारायण आसीन्न ब्रह्मा न च शङ्करः ।
स मुनिर्भूत्वा समचिन्त यत्तत एते व्यजायन्त ।
विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्रा" ॥

— इति ।

"वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः ।
नेन्द्रसूर्यौ न च गुहो न सोमो न विनायकः " ॥

— इत्यादिश्रुतिभ्यश्च ।

"यस्मात्परं नापरमस्ति किञ्चिद्" (म.ना.उ. १२.१३), इत्यत्रापि
'अपरमस्ति' इत्येवार्थः ।

अन्यथा "तेनेदं पूर्णम्" (म.ना.उ. १२.१३) ततो यदुत्तरत्तरं
तदरूपमनामयं इतिवाक्यशेषविरोधात् ।

"तेनेदम्" इत्युक्तमेव "तत" इति परामृश्यते ।

अन्यथा "यस्मात्परं न" इत्युक्तिविरोधात् ।

"नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति" ।

(भाल्लवेयश्रुति, ब्रह्मसूत्रभाष्योदाहृत)

"अस्यैव सर्वनामानि व्यतिरिक्तस्य सर्वतः ।
यः स्वतन्त्रः सदैवैकः स विष्णुः परमोमतः" ॥

— इत्यादिश्रुतिभ्योऽन्यनामान्यस्यैवेति नान्येषां
सर्वेश्वरत्वादिकमुच्यते ।

सर्ववेदेष्वपि अस्य अदोषवचनाद् आदौ अभावावचनाच्च तद्वचनाच्च अन्येषां सर्वेषां वेदेषु सर्वेषु । तेषां सर्वनामत्वानुक्तेश्च ।

"उत्पत्तिर्वासुदेवस्य प्रादुर्भावो न चापरः ।
देहोत्पत्तिस्तदन्येषां ब्रह्मादीनां तदीरणात् ।
देहोऽनादिर्हरेर्नित्यो ब्रह्मादीनामनित्यकाः ।
मुख्योत्पत्तिस्तदन्येषां प्रादुर्भावो हरेर्जनिः" ।

— इति परमश्रुतेश्च ।

॥ इति द्वितियः परिच्छेदः॥

॥ तृतीयः परिच्छेदः॥

ॐ॥ "वर्जितः सर्वदोषैर्यो गुणसर्वस्वमूर्तिमान् ।
स्वतन्त्रो यद्वशाः सर्वे स विष्णुः परमो मतः" ।

— इति परमोपनिषदि ।

"नित्यपूर्णाखिलगुणो निर्दोषः सर्वदैव यः ।
यः स्वतन्त्रः परो विष्णुः जन्ममृत्यादिवर्जितः" ॥

"नारद उवाच ।

निर्दोषश्चेत् कथं विष्णुर्मानुषेषूदपद्यत ।
चिन्ताश्रमव्रणाज्ञानदुःखयुग्दृश्यते कथम् ।
एष मे संशयो ब्रह्मन् हृदि शल्य इवार्पितः ।
अनुद्धार्योऽपरैर्मर्त्यैः सूक्तिशक्त्या तमुद्धर ॥

ब्रह्मोवाच ।

स्त्रीपुङ्मूलाभियोगात्मा देहो विष्णोर्न जायते ।
किन्तु निर्दोषचैतन्यसुखां नित्यां स्वकां तनुम् ।
प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा ।
तथाप्यसुरमोहाय परेषां च क्वचित् क्वचित् ।
दुःखाज्ञानभ्रमादीन् सः दर्शयेत् शुद्धसद्गुणः ।
क्व व्रणादि क्व चाज्ञानं स्वतन्त्राचिन्त्यसद्गुणे ।
दौर्लभ्यायैव मोक्षस्य दर्शयेत्तान्यजो हरिः ।
मिथ्यादर्शनदोषेण तेन मुक्तिं न यान्ति च ।
तमो यान्ति च तेनैव तस्माद् दोषविवर्जितम् ।
प्रादुर्भावगतं चैव जानीयाद् विष्णुमञ्जसा" ॥

— इति ब्रह्माण्डे ।

"गुणक्रियादयो विष्णोः स्वरूपं नान्यदिष्यते ।
अतो मिथोऽपि भेदो न तेषां कश्चित् कदाचन ।
स्वरूपेऽपि विशेषोऽस्ति स्वरूपत्ववदेव तु ।
भेदाभावेऽपि तेनैव व्यवहारश्च सर्वतः" ॥

— इति परमोपनिषदि ।

"अभिन्नत्वमभेदश्च यथा भेदविवर्जितम् ।
व्यवहार्यं पृथक् च स्यादेवं सर्वे गुणा हरेः ।
अभेदाभिन्नयोर्भेदो यदि वा भेदभिन्नयोः ।
अनवस्थितिरेव स्यान्न विशेषणतामतिः ।
मूलसम्बन्धमज्ञात्वा तस्मादेकमनन्तधा ।
व्यवहार्यं विशेषेण दुस्तर्कबलतो हरेः ।
विशेषोऽपि स्वरूपं स स्वनिर्वाहकतास्य च" ॥

— इति ब्रह्मतर्के ।

"एकमेवाद्वितीयम् तत्" (छा.उ. ६.२.१), "नेह् नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह् नानेव पश्यति" (क.उ. ४.११) ।

"यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान् पृथक् पश्यन् तानेवानु विधावति" ॥

— इत्यादिश्रुतेः च ।

"देशः सर्वत्र पुरुषः स्वतन्त्रः कालनित्यता ।
इत्यादिषु स्वसम्बन्धाद्यथैव गुणरूपिणः ।
गुणित्वं गुणभोक्तृत्वं स्याद् विष्णोः तच्च स स्वयम्" ।

— इति ब्रह्मतर्के ।

"विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः ।
निर्दुःखानन्दभुङ्नित्यं तत्समीपे स मोदते ।
मुक्तानां चाश्रयो विष्णुरधिकोऽधिपतिस्तथा ।
तद्वशा एव ते सर्वे सर्वदैव स ईश्वरः" ॥

— इति परमश्रुतिः ।

"अमृतस्यैष सेतुः" (मु.उ. ३.२.७),
"सोऽश्नुते सर्वान् कामान्त्सह ब्रह्मणा विपश्चिता" (तै.उ. २.१),
इत्यादि च ।

"नृपाद्याः शतधृत्यन्ता मुक्तिगा उत्तरोत्तरम् ।
गुणैः सर्वैः शतगुणा मोदन्त इति हि श्रुतिः" ।

— इति पाद्मे ।

अतो 'निश्शेषदोषवर्जितः पूर्णोऽनन्तगुणो नारायण' — इति सिद्धम् ।

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रमवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

स्वतन्त्रायाखिलेशाय निर्दोषगुणरूपिणे ।
प्रेयसे मे सुपूर्णाय नमो नारायणाय ते ॥

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचितः

श्रीमद्विष्णुतत्त्वविनिर्णयः सम्पूर्णः

समाप्तोऽयं ग्रन्थः

॥ भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु॥